अङ्क-२८
जुलाई-दिसम्बर २०१६

**वेदविद्या**
ISSN-2230-8962

# संस्कृतवाङ्मये पाणिनिव्याकरणस्य स्थानम्

**जयन्तकुमार चौधरी**

भारतवर्षमिदं धर्मप्रधानं वर्त्तते। धर्मश्च वेदस्मृतिपुराणशब्दप्रमाणवेद्यः। उक्तञ्च- **'वेदोऽखिलो धर्ममूलम्'**[१] । वेदश्च षडङ्गः। 'षड्वङ्गेषु च व्याकरणं प्रधानम्'[२] इति संस्कृतवाङ्मये व्याकरणस्य महत्त्वं यद्यपि वेदादारभ्य काव्यं यावत् प्रसिद्धमेव तथापि तन्महत्त्वं सुविवेचितं सत नूनमेव काञ्चन स्फुटतां गच्छेत् इति धिया मया तद्विवेचनं प्रस्तूयते।

**व्याकरणपरिभाषा**

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम् । उक्तञ्च- "विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतो। ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम्"।[३]

**व्याकरणशब्दानुशासनयोः पर्यायता**

व्याकरणशब्दानुशासनञ्च पर्यायशब्दौ। यतोहि व्याङ्पूर्वककृधातोः करणे ल्युटि व्याकरणमिति शब्दो निष्पद्यते । अनुपूर्वकात् शासुधातोः करणे ल्युटि अनुशासनं शब्दानामनुशासनं शब्दानामनुशासनमिति व्युत्पत्तिदृष्ट्याऽनयोः पर्यायता सिध्यति। महाभाष्यकारोऽपि व्याकरणस्य शब्दानुशासनमिति सञ्ज्ञां स्वीकुर्वन् सूत्रमेव व्याकरणमिति स्वकीयं सिद्धान्तं स्थापयति।[४]

**व्याकरणप्रयोजनम्**

अस्मिन् जगति यावन्तो हि व्यवहारास्ते शब्दाधीनाः । उक्तञ्च च महाकविना दण्डिना –

**इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीव्यति ॥**[५]

भाषायाः स्वरूपरक्षा तु व्याकरणाधीना। इदमेव कारणं यत् सर्वासां विकसितानां भाषाणां व्याकरणानि निर्मीयन्ते। अतः संस्कृतभाषायाः अपि स्वरूपरक्षायै प्रवृत्तानां विदुषां मनसि झटिति व्याकरणमेव निपतितम् । व्याकरणेन हि शब्दाः व्याक्रियन्ते व्याकृताश्च शब्दाः यथायथं यथाप्रयोगनियमं शिष्टैः प्रयुक्ताः संस्कृतशब्दा भाषापदवीं यान्ति। एवं भाषायाः स्वरूपरक्षणमेव न केवलं

---

[१] मनु. २/५
[२] महाभाष्यम् - पस्पशाह्निकम्
[३] सि.कौ. ल. टीका पृ. ५
[४] महाभाष्यम् – पस्पशाह्निकम् ।
[५] काव्यादर्शः १/४

प्रयोजनमपि तु तस्याः विकासोऽपि व्याकरणाधीनः। अतः संस्कृतभाषायाः स्वरूपस्य रक्षा तस्या विकासश्च संस्कृतव्याकरणस्य सार्वजनीनं महत्त्वम् ।

**पाणिनिव्याकरणस्य प्रयोजनम्**

**'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"** [६] इति व्याहरता महाभाष्यकारेण पञ्च प्रयोजनानि शब्दानुशासनस्य सूचितानि तथापि सूक्ष्मचिन्तनेन तद्भाष्यस्य अयमाशयो लभ्यते यदागमः प्रयोजक एव न प्रयोजनमिति । अत एव 'आगमः खल्वपि' इति भाष्यस्य व्याख्यां कुर्वता कैयटेन उक्तम्- **'आगमः प्रयोजनः प्रवर्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति, प्रयोजनशब्देन च पुलं प्रयोजकश्चोच्यते।** [७] रक्षापदेन अत्र वेदरक्षा गृह्यते । सा च व्याकरणेनैव भवितुं शक्यते। यथा- 'देवा अदुह्र' इति वेदे श्रूयते, लोके तु 'अदुहत' इति। तत्र वेदे तलोपं दृष्ट्वा अवैयाकरणः भ्रान्तिमेत्य वेदं संशोधयन् विनाशयेत्। वैयाकरणस्तु दुहेर्लङो झस्याऽदादेशे कृते सति **'लोपस्त आत्मनेपदेषु (पा. ७/१/४१) इति 'तलोपे बहुलं छन्दसि' (पा. ७/१/८)** इति रूटि अदुह्र इति रूपं सिध्यतीति जानन् पाठान्तरं न कल्पयेदिति भवति वेदरक्षा। तदुक्तं भगवता – 'लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति इति। –

अत एवोक्तं हरिणा -[८]

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामगं प्राहुर्व्याकरणं बुधाः॥**
**प्राप्तरूपविभागाया यो वाचः परमो रसः।**
**यत्तत्पुण्यतमं ज्योतिः तस्य मार्गोऽयमाञ्जसः॥**
**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥**[९]

अनया कारिकया न केवलं रक्षा अपि तु रक्षोहागमरूपाणि त्रीणि प्रयोजनानि प्रतिपादितानि भवन्ति। तत्र 'ब्रह्मणः आसन्नम्' इत्यंशेन वेदरक्षारूपमूहरूपञ्च प्रयोजनं विज्ञायते। 'तपसामुत्तमं तपः' इत्यंशेन च **'ब्राह्मणेन निष्कारणो धर्मो षडङ्गो वेदोऽध्येयो ज्ञेयश्च'** इत्यागमरूपप्रयोजनः प्रतिपादितो भवति। 'छन्दसां प्रथममङ्गम्" इत्यनेन उभयशब्दव्युत्पादकं पाणिनीयव्याकरणमेव वेदाङ्गं न कौमारादिकम्, तस्य लौकिकशब्दमात्रव्युत्पादकत्वात् इति सिद्ध्यति ।

---

[६] महाभा. पस्प.
[७] प्रदीपः – पस्प.
[८] महाभा. पस्प.
[९] वा.प.ब्र.का. ११-१३

द्वितीयकारिकायां 'मार्गोऽयमाञ्जसः' इत्यंशेन लाघवं प्रतिपादितम् । तृतीयया कारिकया सन्देहाभावरूपं पञ्चमं प्रयोजनं व्युत्पादितम्। इत्थं वेदरक्षा वैदिकमन्त्रेषु प्रकृति-प्रत्ययादीनामूहः, लाघवेन शब्दज्ञानम् 'स्थूलपृषतीमग्निवारुणीमनड्वाहीमालभेत' इत्यत्र स्वरविषयकसन्देहाभाव इति चत्वारि प्रयोजनानि प्रयोजकश्चागमो व्याकरणाध्ययनस्येति सुविदितमेव अतो न वितन्यते ।

व्याकरणेषु पाणिनीयं व्याकरणं न केवलं संस्कृतभाषायाः स्वरूपमेव व्यवस्थापयति ज्ञापयति च, नापि चैतद् वैदिकवाङ्मयस्य वा केवलं स्वरूपोपदर्शकं संरक्षकं च, नापि वेदं वैदिकलौकिकशब्दानां केवलं व्युत्पादकं वा अपि तु न्यायसाङ्ख्यवेदान्तादिदर्शनैः क्रमशः कर्तृत्वोदासीनविवर्त्तोपादानत्वादिना यद् ब्रह्म निरूप्यते तद्वस्तुतः आन्तरप्रणवरूपमेव। तस्य प्राप्तिरेव मोक्षः सोऽपि व्याकरणेनैव प्राप्यते। तदुक्तं हरिणा-

**यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।**
**तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते॥**[१०]

शब्दब्रह्मैव जगत्कारणमिति पाणिनीयानामुद्घोषः चिराजयति। अत एव व्याकरणाध्ययनप्रयोजनप्रतिपादनावसरे भर्तृहरिणोक्तम् –

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥**[११]

तथा च – **अपि प्रयोक्तुरात्मानं शब्दमन्तरमवस्थितम्।**
**प्राहुर्महान्तवृषभं येन सायुज्यमिष्यते ॥**[१२]

शब्दब्रह्मणः स्वरूपं वर्णयन् भर्तृहरिणोक्तम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[१३]

संस्कृतव्याकरणक्षेत्रे अद्वितीयभाषाशास्त्रिपाणिनेः व्याकरणं मूर्धाभिषिक्तमस्ति। तस्याष्टके संस्कृतवाङ्मयस्य शब्दानां प्रकृतिप्रत्ययनिर्धारणाय विरचिता नियमा वैज्ञानिकशैल्या उपस्थापिताः सन्ति। इदञ्च मानवबुद्धेः चरमोत्कर्षद्योतकम् । यद्यपि पाणिनेः प्राक् अनेके शाब्दिका अभवन् परञ्च तेषां शाब्दिकानां ग्रन्थाः परिपक्वाः नासन् अथवा तेषां कृतयः लुप्ताः जाताः। महाभाष्यकारोऽपि पाणिनिमेव स्तौति- **'प्रमाणभूतः आचार्यो दर्भपवित्रपाणिः शुचावकाशो प्राङ्मुखः उपविश्य महता प्रयत्नेन सूत्राणि प्रणयतिस्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनः इयता सूत्रेण।**[१४]

---

[१०] वा.प. ब्र. का. १/२२
[११] तत्रैव १/१४
[१२] तत्रैव १/१३१
[१३] तत्रैव १/१
[१४] महाभाष्यम्

तथा च – **'सामर्थ्ययोगान्न हि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्।'**[15] एवमेव काशिकायां स्तुतः आचार्यपाणिनिः-

**'महती सूक्ष्मेक्षिका वर्त्तते सूत्रकारस्य'**[16] न केवलं भारतीयविद्वांसः अपितु अनेके वैदेशिकाः अपि पाणिनिव्याकरणस्य प्रशंसकाः सन्ति। यथा –

मैकडालनमहोदयः[17], गोल्डस्टुकर महोदयः[18], टी.बरः[19], मोनियर विलियम्स[20] इत्यादयः।

सम्पूर्णं संस्कृतवाङ्मयं व्याकरणालोकं विना तमसोच्छन्नं न केवलं सामान्यविदुषां प्रत्युत समेषामेव विद्वद्धौरेयाणामपि ज्ञानचक्षुगोचरतां प्राप्तुमक्षमम्। तदुक्तं भास्कराचार्येण –

**यो वेद वेदवदनं सदनं हि सम्यक् ब्राह्म या स वेदमपि वेद किमन्यशास्त्रम्।**
**यस्मादतः प्रथममेतदधीत्य धीमान् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।**[21]

पातञ्जलमहाभाष्ये शब्दरूपो वृषभः सर्वान् स्वर्गमोक्षादीन् कामान् वर्षतीति प्रतिपादयन् व्याकरणस्य महत्त्वं निम्नलिखितश्रुत्या भगवता पतञ्जलिना प्रतिपादितम्। तथाहि –

**च॒त्वारि॒ शृङ्गा॒ त्रयो॑ अस्य॒ पादा॒, द्वे शी॒र्षे स॒प्त हस्ता॑सो अस्य।**
**त्रिधा॑ ब॒द्धो वृ॑षभो रो॑रवीति, म॒हो दे॒वो मर्त्या॒म् आवि॑वेश॥**[22]

शब्दवृषभस्य नामाख्यातोपसर्गनिपातेति चत्वारि शृङ्गा, भूतभविष्यत्वर्त्तमानेति कालास्त्रयः पादाः, नित्य-(स्फोट), कार्य-(ध्वनि), भेदेन शब्दस्य द्वे शीर्षे, प्रथमादि-सप्तविभक्तयो हस्ताः, उरसि कण्ठे शिरसि च बद्धताया त्रिधाबद्धो वृषभः- शब्द-ब्रह्मरूपः रोरवीति- शब्दं करोति, यो महान् देवः शब्दः, मर्त्यान् अर्थात् मनुष्यान् आविवेश।

अस्य ऋग्वेदमन्त्रस्य व्याख्यां कुर्वता मुनिना पतञ्जलिना **'महता देवेन वः साम्यं यथा स्यात्"** अर्थात् शब्दब्रह्मणा अस्माकम् ऐक्यं यथा स्यात् इति प्रतिपादयता व्याकरणस्यानुत्तमं प्रयोजनम् अगादि।

**'ब्रह्मविद् ब्रह्मैव भवति'** इति श्रुत्या शब्दब्रह्मवित् शब्दब्रह्मैव भवतीति प्रतिपादनपरकोऽयमृङ्मन्त्रः शब्दशाब्दिकयोः ऐक्यं प्रतिपादयति। मन्ये प्रकृतिप्रत्ययविभागपुरस्सरं शब्दस्वरूपपरिज्ञानमेव व्याकरणस्य परमं प्रयोजनम्।

---

[15] महाभाष्यम्
[16] काशिका, अ. ४
[17] इण्डियाज पास्ट, पृ. १३६
[18] पाणिनि हिज़ प्लेस इन् संस्कृत लिट्रेचर
[19] दि संस्कृत लैंग्वेज, पृ. ४७
[20] इण्डियन विज़डम, पृ. १७२
[21] सिद्धान्तशिरोमणिः – गोलाध्यायः, श्लोकः ८
[22] ऋग्वेदः अष्टकः ३/८/१० ; मण्डलम् ४/५८/३

प्रकृतिप्रत्ययविभागेन शब्दस्वरूपज्ञापनार्थं विरचितेषु ऐन्द्राद्यष्टव्याकरणेषु तदन्येषु च व्याकरणेषु प्रायः केवलं लौकिकशब्दानामेव व्युत्पादनं दृश्यते ।

पाणिनिव्याकरणे तु लौकिकवैदिकोभयशब्दव्युत्पादनं कृतम्। अतः सकलशब्दव्युत्पादकतया पाणिनीयस्यैव व्याकरणस्य सर्वोपरि स्थानं विद्यते इति वक्तुं शक्यते ।

पाणिनेरष्टाध्यायी एका सर्वाङ्गपूर्णा कृतिरस्ति, यस्यां लौकिकवैदिकोभयविधशब्दानां सिद्धये नियमनिर्देशाः अपूर्वा सर्वमान्याश्च सन्ति।

मैक्डानलमहोदयस्य कथनमस्ति यत् पाणिनीयं व्याकरणम् एतादृशीं ख्यातिमार्जयद् यदाधारेण वक्तुं शक्यते यद्भारतीयव्याकरणे विश्वस्मिन् सर्वप्रथमं शब्दानां वैज्ञानिकं विवेचनं जातम्।

अस्य तुलना विश्वस्य केनापि व्याकरणेन न कर्त्तुं शक्यते।[२३]

भारतस्य भाषागतपरम्परायां साहित्यक्षेत्रे पाणिनिव्याकरणेन कमपि नवयुगानुवर्तनं विहितम् ।

यत्र वैदिकयुगापेक्षया व्याकरणशास्त्रस्याऽभिवृद्ध्यर्थं नवं नवं कार्यमजायत। भारतीय प्रसिद्धेन भाषाविदा बाबूसुनीतिकुमारचटर्जीमहोदयेनापि स्पष्टमुक्तमस्ति यद्- 'यदा ऋग्वेदस्य भाषा किञ्चित् प्राचीना सर्वसाधारणस्य कृते आंशिकरूपेण दुर्बोधा चानुभूता। यदा भारतीयार्यभाषाया एकम् अर्वाचीनतां रूपं विशिष्टसाहित्यिकभाषारूपेण प्रतिष्ठापयितुं पश्चिमोत्तरपञ्जाबनिवासिना पाणिनिना नवीन-साहित्यिकभाषाव्याकरणं विरच्य लौकिकभाषायाः रूपं प्रदत्तम्।[२४]

पाणिनेः अष्टाध्याय्या अस्तित्वं तावत्कालपर्यन्तं स्थास्यति यावत्कालपर्यन्तं विश्वस्मिन् संस्कृतस्य अध्ययनाध्यापनप्रवाहः प्रचलिष्यति। पाणिनेरष्टाध्याय्यां चतुःसहस्राणि सूत्राणि सन्ति, तथा चेयम् अष्टसु अध्यायेषु विभक्तास्ति, यत्र प्रत्येकस्मिन् अत्यन्तसरलया, मनोरमया सूत्राणां रचना कृतास्ति तया वयमनायासेन अवगच्छामः।

अतः परं पाणिनीयव्याकरणविषये आधुनिकानां विदुषां मतानि प्रदर्श्यन्ते-इङ्ग्लैण्डवास्तव्यः प्रो. मोनियरविलियम्स महोदयो वक्ति यत्-"संस्कृतं व्याकरणं तस्याः मानवमस्तिष्कप्रतिभायाः आश्चर्यतमः आदर्शोऽस्ति, यः केनापि देशेन नाऽद्यावधि आविष्कृतः[२५] -

जर्मनीदेशस्थः श्रीमैक्समूलरमहोदयो ब्रवीति यत्-

'हिन्दूनां व्याकरणस्य योग्यता विश्वस्य कस्या अपि जातेर्व्याकरणसाहित्यादधिकं विद्यते।[२६]

सरहण्टरमहोदयः कथयति यत्-

विश्वव्याकरणेषु पाणिनीयव्याकरणं शेखरीभूतमस्ति । तस्य वर्णशुद्धता भाषायाः धात्वन्वयसिद्धान्तः, प्रयोगविधयश्चाद्वितीया अपूर्वाश्च सन्ति।[२७]

---

[२३] संस्कृतसाहित्य का इतिहास – वाचस्पति गैरोला, पृ० ६२९

[२४] तत्रैव, पृ० ६३२

[२५] महान् भारत, रमाशङ्कर मिश्र, पृ० १४३

[२६] तत्रैव, पृ. १४९

रूसदेशस्थलेनिनग्रादनगरीयेण श्री प्रो. टी. शेरवात्स्कीमहोदयेन पाणिनीयव्याकरणविषये उक्तं यत्-

"पाणिनीयव्याकरणं मानवमस्तिष्कस्य सर्वोत्कृष्टकृतिष्वेकमस्ति।"[२८]

सुप्रसिद्धेन आधुनिकभाषावैज्ञानिकेन ब्लूमफील्डमहोदयेनोक्तम्- "अनेकेषां वर्षाणामेतादृश-परिश्रमेण अस्माभिः प्राचीनतमं व्याकरणं पाणिनीयं व्याकरणमुपलब्धं व्याकरणमिदम्। अस्य रचनाकालः ३५० ईशवीयपूर्वतः २५० ईशवीयपूर्वं भवितुमर्हति, मानवबुद्धिमत्तायाः महत्तमासु कृतिष्वेकास्ति।[२९]

**पाणिनीयव्याकरणस्य विकासः**

भाषाविकासदृष्ट्या पाणिनिव्याकरणस्य भागत्रयं कर्त्तुं शक्यते –

(क) अष्टाध्यायीक्रमः

(ख) प्रक्रियाक्रमः

(ग) दार्शनिकक्रमः

**अष्टाध्यायीक्रमः**

अस्मिन् क्रमे तेषां ग्रन्थानां समावेशः कर्त्तुं शक्यते येषु अष्टाध्याय्यां विद्यमानस्य सूत्रक्रमस्यानुसारमेव व्याख्या वर्त्तते। अधुना अस्मिन् क्रमे- "पातञ्जलमहाभाष्यम्, वामनजयादित्ययोः "काशिकावृत्तिः" एवं दीक्षितमहोदयस्य "शब्दकौस्तुभम्' मुख्यरूपेण वर्त्तन्ते।

**प्रक्रियाक्रमः**

अस्य क्रमस्य विकासः एकादशशताब्द्यामभवत् अष्टाध्यायीस्थ सूत्राणां शब्दरूपसाधनदृष्ट्या भिन्न-भिन्न प्रकरणेषु लेखनमभवत्। अद्य इयं लोकप्रियपद्धतिः वर्त्तते। अस्मिन् क्रमे सर्वप्रथमम् आचार्यधर्मकीर्त्तेः 'रूपावतार" इति ग्रन्थो वर्त्तते। "रूपमाला", रामचन्द्राचार्यस्य "प्रक्रियाकौमुदी", भट्टोजिदीक्षितस्य "सिद्धान्तकौमुदी", वरदराजस्य "लघुसिद्धान्तकौमुदी" च मुख्या वर्त्तते।

**दार्शनिकक्रमः**

यद्यपि व्याकरणशास्त्रस्य मुख्यप्रयोजनं शब्दानां साधुत्वासाधुत्वविज्ञानम्।[३०] तथापि अर्थविहीनस्य शब्दस्य साधुत्वनिर्णयः असम्भवः। अतः अर्थस्य विचारोऽस्ति। अस्मिन् क्रमे सर्वप्राचीनः आचार्यः स्फोटायनः मन्यते। अयमेव सम्भवतः 'स्फोटवादस्य' जनकः। पाणिनिनापि एतस्योल्लेखः 'अवङ्

---

[२७] तत्रैव, पृ.१५०

[२८] हिन्दुस्तान की कहानी, पं. जवाहरलाल नेहरू, पृ. १३१

[२९] लियोनार्ड ब्लूमफील्ड- लैंग्वेज

[३०] साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः (वा.प.१/१४२)

स्फोटायनस्य (पा.सू. ६/१/१२३) इति सूत्रे कृतः । शब्दतत्त्वस्य प्राचीनचिन्तकेषु औदुम्बरायणाचार्यस्यापि स्थानं वर्तते।[३१]

अस्यां परम्परायां 'व्याडेः' सङ्ग्रहः अपि वर्त्तते।[३२] अनन्तरं महाभाष्यम् अस्मिन् ग्रन्थसिन्धौ व्याकरणदर्शनस्य सकलपदार्थानां चर्चा भिन्न-भिन्न स्थलेषु वर्त्तते। अस्यातिरिक्तम् आचार्यभर्तृहरेः त्रिकाण्डात्मकं 'वाक्यपदीयम्' उत्कृष्टः ग्रन्थो वर्त्तते। अन्यत् तु स्फोटसिद्धिः, स्फोटप्रतिष्ठा, स्फोटवादः इत्यादयः व्याकरणस्य दार्शनिकग्रन्थाः सन्ति।

इत्थं कथयितुं शक्यते यत् सकलशब्दजनकः पाणिनीयव्याकरणं जगति सर्वोत्कृष्टं स्थानं भजते।

**जयन्तकुमार चौधरी**

शोधच्छात्रः, व्याकरणविभागः

राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली

[३१] संस्कृतव्याकरण का इतिहास, पृ. ३४४

[३२] सङ्ग्रहे एतत् प्राधान्येन परीक्षितम् – (महाभाष्यम्-पस्पशाह्निकम्)